**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** **ISSN: 2581-6241** **Volume - 4, Issue - 2, Feb- 2021**
**Monthly, Peer-Reviewed, Refereed, Indexed Journal** **Impact Factor: 3.871**
**Received on : 01/02/2021** **Accepted on : 14/02/2021** **Publication Date: 15/02/2021**

# न्यायवैशेषिकदर्शनयोः केषुचिन्नञर्थघटितसिद्धान्तेषु नञर्थविचारः

**Sankar Mondal**
PhD Scholar, Department of Sanskrit, Ramakrishna Mission Vidyamandira
Belur Math, Howrah-711202, West Bengal, India
Email – sankarmondal109@gmail.com

**शोधसारः** समग्रेऽस्मिन् संस्कृतवाङ्मये चतुर्विधं पदं राजते – नाम आख्यातमुपसर्गो निपातश्चेति। निपातेष्वान्यतम्यं तथा प्राधान्यं भजते "नञ्" इति। यद्वा भवतु नञर्थः प्रतिषेधः प्राधान्येन द्विविधः पर्युदासः प्रसज्यश्चेति। तत्र पर्युदासो भवति सदृग्ग्राही, प्रसज्यस्तु निषेधकृत्। पर्युदासे विधेः प्राधान्यं, प्रसज्ये तु निषेधस्यैव प्राधान्यम्। अन्यत्रापि नञः सादृश्यादयः षडर्था उक्ताः। नञर्थेन घटिता नञर्थघटिताः। नञर्थघटिताश्चामी सिद्धान्ताः नञर्थघटितसिद्धान्ताः। तत्र न्यायवैशेषिकदर्शनयोः कीदृशा नञर्थघटितसिद्धान्ता वर्तन्ते, तत्र नञः कीदृगर्थमभिप्रेत्य सिद्धान्तो गृहीतः, तस्यान्यार्थग्रहणे का हानिः को वा लाभ इत्येतत्सर्वमालोचयिष्यतेऽस्मिन् प्रबन्धे। तद्यथा वैशेषिकाणां सामान्यलक्षणम्- नित्यत्वे सत्यनेकसमवेतत्वम् इति। यद्यत्र अनेकपदघटकनञः प्रसज्यरूपार्थः क्रियते तर्हि द्रव्यवृत्तिजातौ अव्याप्तिः। पर्युदासरूपार्थे कृतेऽपि गुणवृत्तिजातौ अव्याप्तिः। अतोऽत्र अनेकसमवेतत्वपदस्य भिन्नोऽर्थः स्वीकर्तव्यः। तच्च भवति "स्वाश्रयान्योन्याभावसामानाधिकरण्यम्" इति। एवम्प्रकारेणात्रान्येऽपि केचन सिद्धान्ता आलोचिताः।

**कूटशब्दाः-** नञ्, प्रसज्यः, पर्युदासः, अभावः, अव्यभिचारि ।

## शोधः (मुख्यांशः)

भारतीयदार्शनिकपरम्परा ह्यास्तिकनास्तिकभेदेन द्वैविध्यं गता। षट्सु आस्तिकदर्शनेषु न्यायवैशेषिकौ समानतन्त्राविति प्रसिद्धिः। नीयते प्राप्यते विवक्षितार्थसिद्धिरनेन इति विग्रहे निपूर्वकात् इण्धातोः करणवाच्ये घञा निष्पन्नोऽयं न्यायशब्दः परीक्षणं परार्थानुमानं वा बोधयति। उक्तं च – "प्रमाणैरर्थपरीक्षणं न्यायः" इति। न्यायकुसुमाञ्जलेः हरिदासकृत व्याख्यायामप्युक्तं – "न्यायः समस्तरूपोपपन्नलिङ्गप्रतिपादकं वाक्यम्"[1] इति। महर्षिणा गौतमेन प्रणीतमिदं दर्शनं न्यायदर्शनमिति प्रसिद्धम्। महर्षिणा कणादेन च प्रणीतं दर्शनं भवति वैशेषिकदर्शनम्। विशेषं पदार्थमधिकृत्य कृतो ग्रन्थः इत्यर्थे विशेषशब्दात् ठञ्प्रत्यये वैशेषिकशब्दो निष्पन्नः। सिद्धान्तो नामाभ्युपगम्यमानोऽर्थः। स च सिद्धान्तश्चतुर्विधः – सर्वतन्त्रसिद्धान्तः प्रतितन्त्रसिद्धान्तः अधिकरणसिद्धान्तः अभ्युपगमसिद्धान्तश्चेति। तथा च सूत्रं - "स चतुर्विधः सर्वतन्त्र प्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात्"[2] इति।

शास्त्रं भवति शब्दात्मकम्। समग्रेऽस्मिन् संस्कृतवाङ्मये चतुर्विधं पदं राजते – नाम आख्यातमुपसर्गो निपातश्चेति। तत्र "उच्चावचेष्वर्थेषु निपतन्ति"[3] इति निपातलक्षणं लक्षितं यास्काचार्येण। केषाञ्चिन्नये निपाता अर्थस्य द्योतका भवन्ति, अपरेषां नये तेऽर्थस्य वाचका भवन्ति, अन्ये तु निपाताः सम्भूयार्थद्योतका इति प्रतिपादयन्ति। अत एव कथितं भर्तृहरिणा-

"निपाता द्योतकाः केचित्पृथगर्थाभिधायिनः।

आगमा इव केऽपि स्युः सम्भूयार्थस्य वाचकाः"[4]।। इति।

निपातेष्वान्यतम्यं तथा प्राधान्यं भजते "नञ्" इति। नञर्थो ह्यभावः। स चाभावो द्विविधः संसर्गाभावोऽन्योन्याभावश्चेति। अत एव कथितं रघुनाथशिरोमणिना नञ्वादग्रन्थे- "संसर्गाभावोऽन्योन्याभावश्च नञोऽर्थः"[5] इति। संसर्गाभावः पुनस्त्रिविधः प्रागभावः प्रध्वंसाभावः अत्यन्ताभावश्चेति। अत्रेदमुल्लेख्यं यन्नागेशभट्टनये प्रागभावप्रध्वंसाभावयोः

---

1 न्यायकुसुमञ्जलेः हरिदासकृता व्याख्या (विश्वेश्वरसिदाद्धान्तशिरोमणिसम्पादिता, २०१९ विक्रमाब्द, पृ.१०)

2 न्यायसूत्रम् (१/१/१७)

3 निरुक्तम्, प्रथमाध्यायः (तारकनाथ अधिकारीसम्पादितम्, २०१६, पृ.७५)

4 वाक्यपदीयम्

5 नञ्वादः (सञ्जितकुमार साधुखानसम्पादितमः, २०१३, पृ.१)

नञ्प्रतिपाद्यत्वं नास्ति। तथा सति "रक्षोहागमलघ्वसन्देहाः प्रयोजनम्"[6] इति व्याकरणप्रयोजनप्रतिपादके महाभाष्यग्रन्थे असन्देहपदस्य सन्देहप्रागभाव एवार्थः इति वैयाकरणसिद्धान्तस्य भट्टमते कथं संगतिः स्यादिति चिन्तनीया। यद्वा भवतु नञर्थः प्रतिषेधः प्राधान्येन द्विविधः पर्युदासः प्रसज्यश्चेति। तत्र पर्युदासो भवति सदृग्ग्राही, प्रसज्यस्तु निषेधकृत्। अत उक्तं-

द्वौ नञौ च समाख्यातौ पर्युदासप्रसज्यकौ।
पर्युदासः सदृग्ग्राही प्रसज्यस्तु निषेधकृत् ।।इति।

पर्युदासे विधेः प्राधान्यं, प्रसज्ये तु निषेधस्यैव प्राधान्यम्। अत एव कथितं-

प्राधान्यं हि विधेर्यत्र प्रतिषेधेऽप्रधानता।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्।।
अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता।
प्रसज्यप्रतिषेधोऽयं क्रियया सह यत्र नञ्।। इति।

एवं च प्रसज्यपर्युदासयोरपि अत्यन्ताभावान्योन्याभावयोरेव पर्यवसानम्। अन्यत्रापि नञः षडर्थाः उक्ताः। यत्तु-

"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः"[7]।।

इत्युक्तं भर्तृहरिणा तत्तु आर्थिकार्थमभिप्रेत्य इति प्रतिपादितं कौण्डभट्टेन वैयाकरणभूषणसारे।

नञर्थेन घटिता नञर्थघटिताः। नञर्थघटिताश्चामी सिद्धान्ताः नञर्थघटितसिद्धान्ताः। तत्र न्यायवैशेषिकदर्शनयोः कीदृशा नञर्थघटितसिद्धान्ता वर्तन्ते, तत्र नञः कीदृगर्थमभिप्रेत्य सिद्धान्तो गृहीतः, तस्यान्यार्थग्रहणे का हानिः को वा लाभ इत्येतत्सर्वमालोचयिष्यतेऽस्मिन् प्रबन्धे। वस्तुतस्तु तादृशाः सिद्धान्ता भूय एव वर्तन्ते इति तेषु केषाञ्चन दिग्दर्शनमेव कारयिष्यतेऽत्र। तद्यथा-

**वैशेषिकाणां सामान्यलक्षणप्रतिपादने नञर्थविचारः**

कणभक्षपक्षकक्षीकृद्भिः वैशेषिकैः स्वीकृतेषु पदार्थसप्तकेषु अन्यतमं भवति सामान्यम्। समानानां परस्परभिन्नत्वे सति एकधर्मवतां भावः परस्परभेदसमानाधिकरणो धर्मविशेष इति विग्रहे समानशब्दात् भावार्थे यण्प्रत्यये सामान्यशब्दो निष्पन्नः। "सामान्यं विशेष इति बुद्ध्यपेक्षम्"[8] इति सूत्रितं महर्षिणा कणादेन। तत्र तु सामान्यपदार्थस्य निर्दिष्टं सुस्पष्टं वा लक्षणं किमपि नोक्तं महर्षिणा। अत एव श्रीमता शङ्करमिश्रेणोपस्कारटीकायां सामान्यपदनिर्वचननिष्कर्षरूपं लक्षणं कृतं- "नित्यमनेकव्यक्तिवृत्ति सामान्यम्"[9] इति। किन्तु केवलं नित्यमनेकवृत्ति सामान्यमित्येतावतैव लक्षणेन अत्यन्ताभावेऽतिव्याप्तिः स्यात्, अत्यन्ताभावस्य नित्यत्वादनेकवृत्तित्वाच्च। अत एव न्यायसिद्धान्तमुक्तावल्यां विश्वनाथन्यायपञ्चाननेन "नित्यत्वे सति अनेकसमवेतत्वम्"[10] इति निष्कृष्टं सामान्यलक्षणं कथितम्। तथात्वे तु अत्यन्ताभावे सामान्यलक्षणस्यातिव्याप्तिर्वार्यते तस्यानेकसमवेतत्वाभावात्, अभावस्य स्वरूपसम्बन्धेनैव स्वाधिकरणवृत्तित्वात्। अनेकसमवेतत्वपदस्य निर्वचनं तु इत्थं- न एकः अनेकः, तत्र समवेतम् अनेकसमवेतं, तस्य भावः अनेकसमवेतत्वम् इति। नन्वत्र अनेकपदे यः नञ् प्रयुक्तः तस्य कीदृर्थोऽभिप्रेत इति विचार्यः। नञर्थः प्रतिषेधो द्विविधः पर्युदासः प्रसज्यश्चेति। यद्यत्र नञः प्रसज्यरूपार्थः स्वीक्रियते तर्हि अर्थः स्यात् – एकत्वं न वर्तते यस्मिन् तद् अनेकं, तत्र समवेतं नाम सामान्यमिति, प्रसज्यनञो निषेधप्राधान्यात् क्रियान्वयनियमाच्च। तथात्वे तु द्रव्यवृत्तिजातौ अव्याप्तिः स्यात्। तथाहि घटत्वसामान्यं घटे वर्तते, घटे च एकत्वसंख्यापि स्यादेव एकत्वस्य वस्तुमात्रसाधारण्यात्। अत एव प्रसज्यपक्षः त्याज्यते। पर्युदासपक्षे तु अर्थः स्यात् – एकत्वभिन्नमनेकत्वं वर्तते यस्मिन् तदनेकं, तत्र समवेतं नाम सामान्यम् इति, पर्युदासस्य विधिप्राधान्यात् नामार्थान्वयनियमाच्च। तथात्वेऽपि गुणवृत्तिजातौ अव्याप्तिः स्यात्। तथाहि रूपे रूपत्वं वर्तते, किन्तु तत्रानेकत्वसंख्या नास्ति, गुणे गुणाभावात्। उक्तं च कारिकावल्यां-

"गुणादिर्निर्गुणक्रियः"[11] इति।

---

[6] व्याकरणमहाभाष्यम् ,पस्पशाह्निकम् (दण्डिस्वामीसम्पादितम्, १४१७बङ्गाब्द, पृ.३०)
[7] वैयाकरणभूषणसारः (नन्दिकिशोरसम्पादितः, २०१२, पृ.४३८)
[8] वैशेषिकसूत्रम् (१/२/३)
[9] वैशेषिकसूत्रस्योपस्कारटीका (साबिर आलिसम्पादितः, २०१३, पृ.२३५)
[10] न्यायसिद्धान्तमुक्तावली (पञ्चाननभट्टाचार्यसम्पादितः,२०१६, भाषापरिच्छेदः, पृ.५१)
[11] भाषापरिच्छेदः (कारिका.१४)

तस्माच्च पर्युदासपक्षोऽपि नाङ्गीकर्तुं शक्यः। इत्थं विचारयद्भिः किरणावल्याः प्रकाशटीकाकृद्भिः अनेकसमवेतत्वपदस्य भिन्नोऽर्थः स्वीकृतः। तच्च भवति "स्वाश्रयान्योन्याभावसामानाधिकरण्यम्" इति। तथाहि स्वं नाम घटत्वसामान्यं, तस्याश्रयः तद्घटः, तदन्योन्याभावो वर्तते एतद्घटे, तद्वृत्ति च भवति घटत्वम्। अत एव घटत्वसामान्ये स्वाश्रयान्योन्याभावसामानाधिकरण्यरूपं लक्षणं संगच्छते। अत एव कथितं शङ्करमिश्रेण –

"नित्यत्वे सति स्वाश्रयान्योभावसामानाधिकरण्यं वा"[12] इति।

भाषापरिच्छेदस्य दिनकरीटीकायां तु नञः पर्युदासपक्षमेवाश्रित्योक्तम्-

"अनेकत्वमेकभिन्नत्वं, जलपरमाणुरूपादौ अतिव्याप्तिवारणायोक्तो विशेष्यभागः"[13] इति।

ननु अनेकत्वं नाम एकभिन्नत्वं नाम एकप्रतियोगिकभेदवत्त्वमिति चेत् रूपेऽतिव्याप्तिः। तथाहि द्वयोः भिन्नयोः जलपरमाण्वोः मध्ये एकस्मिन् परमाणौ द्वितीयस्य भेदो वर्तते। तेन तत्र यत्किञ्चिदेकप्रतियोगिकभेदस्तु वर्तते एव। एवं च तत्र रूपमपि समवेतम्। अत एव रूपे सामान्यलक्षणस्यातिव्याप्तिरिति चेदत्रोच्यते एकभिन्नत्वं नाम एकत्वावच्छिन्नप्रतियोगिताकभेदवत्त्वम् इति। एकत्वावच्छिन्नप्रतियोगिताकभेदस्य च तस्मिन् परमाणौ अभावात् न तत्र सामान्यलक्षणस्यातिव्याप्तिः इति। ननु एकत्वस्य वस्तुमात्रसाधारण्येन केवलान्वयित्वात् एकत्वावच्छिन्नप्रतियोगिताकभेद एव अप्रसिद्ध इति चेन्न "उभयमेकं न" इत्याद्यत्र उभयत्वावच्छिन्ने एकत्वावच्छिन्नप्रतियोगिताकभेदस्य प्रसिद्धत्वात्। ननु तथापि उभयत्वावच्छिन्ने जलपरमाणुद्वये एकत्वावच्छिन्नप्रतियोगिताकभेदसत्त्वे तत्रापि अनेकत्वस्य वृत्तित्वम्। एवं च तत्र रूपमपि समवेतम्। अतः पुनः रूपे सामान्यलक्षणस्यातिप्रसङ्ग इति चेन्न यदवच्छेदेन एकत्वावच्छिन्नप्रतियोगिताकभेदस्य वृत्तित्वं तदवच्छेदेनैव समवायेन वृत्तिमतः पदार्थस्य जातित्वेन विवक्षितत्वात्। अत्र तु एकत्वावच्छिन्नप्रतियोगिताकभेदोऽस्ति उभयावच्छेदे, रूपं तु वर्तते प्रत्येकावच्छेदे। अतो न रूपे सामान्यलक्षणस्यातिव्याप्तिः।

इत्थं चास्मिन् पक्षे बहुविचारस्यावश्यकतया रामरुद्रीकृता अनेकपदघटकनञः पर्युदासरूपमर्थमपि परित्यज्य अनेकसमवेतत्वपदस्य अन्योऽर्थः कथितः। तथाहि उक्तं तेन-

"वस्तुतस्तु स्वप्रतियोगिसमवेतत्वस्वाधिकरणसमवेतत्वोभयसम्बन्धेन भेदविशिष्टत्वस्यैव अनेकसमवेतत्वान्न काप्यनुपपत्तिः"[14] इति।

## नैयायिकानां प्रत्यक्षलक्षणप्रतिपादने नञर्थविचारः

न्यायसम्मतचतुर्विधप्रमाणेषु प्रथमं हि प्रत्यक्षम्। प्रतिगतमक्षमिति विग्रहे "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इति सूत्रेण प्रादिसमासे प्रत्यक्षशब्दो निष्पन्नः। प्रत्यक्षस्य लक्षणमुक्तं महर्षिणा- इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्"[15] इति। तथाहि इन्द्रियार्थसन्निकर्षोत्पन्नम् अव्यभिचारि ज्ञानं प्रत्यक्षमिति प्रत्यक्षलक्षणम्, अव्यपदेश्यं व्यवसायात्मकमिति च प्रत्यक्षस्य द्वौ विभागौ। इन्द्रियार्थसन्निकर्षस्तु षड्विधः – संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायः विशेष्यविशेषणभावश्चेति। अर्थो विषयः। तत्र विषयेण सह इन्द्रियस्य संयोगाद्यन्यतमसन्निकर्षात् यदव्यभिचारि ज्ञानं जायते तदेव प्रत्यक्षमिति लक्षणस्याशयः। ननु अत्र अव्यभिचारिपदघटकनञा कीदृशोऽर्थो विवक्षित इति विचार्यः। पर्युदासपक्षे तस्य द्वौ अर्थौ सम्भाव्येते – भ्रमभिन्नत्वम् इति, तद्वति तत्प्रकारत्वमिति च पर्युदासस्य विधिप्राधान्यात्। भ्रमभिन्नं ज्ञानं प्रत्यक्षमित्युक्ते शुक्तौ "इदं रजतमि"ति आंशिकभ्रमज्ञानेऽव्याप्तिः स्यात्, किन्तु आंशिकभ्रमस्यापि लक्ष्यत्वेन तद्वति तत्प्रकारत्वम् इति वक्तव्यम्। अत उक्तं न्यायसूत्रवृत्तौ विश्वनाथन्यायपञ्चाननेन-

"भ्रमवारकमव्यभिचारि, भ्रमभिन्नमित्यर्थः। इदञ्चांशिकभ्रमस्यालक्ष्यत्वे, तल्लक्ष्यत्वे तु तद्वति तत्प्रकारत्वम्"[16] इति।

किन्तु पर्युदासपक्षकक्षीकारेण यदर्थद्वयमुक्तं तत्र उभयथापि दोषः स्यात्। तथाहि भ्रमभिन्नत्वमव्यभिचारित्वमित्युक्ते निर्विकल्पकप्रत्यक्षेऽव्याप्तिः स्यात्। तथाहि नव्यनये निर्विकल्पकं हि प्रमाप्रमाबहिर्भूतं ज्ञानम्। "प्रमाणतोऽर्थप्रतिपत्तौ

---

[12] वैशेषिकसूत्रोपस्कारः (साबिर आलिसम्पादितः २०१३, पृ.२३५)

[13] दिनकरीयम् (शङ्कररामशास्त्रीसम्पादिता कारिकावली, १९२३, पृ.९८)

[14] रामरुद्रीयम् (शङ्कररामशास्त्रीसम्पादिता कारिकावली, १९२३, पृ.९८)

[15] न्यायसूत्रम् (१/१/४)

[16] न्यायसूत्रवृत्तिः( साबिर आलिसम्पादिता, २०१५, पृ.६८)

प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणम्”[17] इति भाष्यप्रामाण्यात् प्रमायाः सफलप्रवृत्तिनिवृत्तिजनकत्वं च ध्येयम्। निर्विकल्पकं तु प्रवृत्तेर्वा निवृत्तेर्वा जनकमेव न भवति। अत एव निर्विकल्पकं न प्रमा नापि अप्रमा। उक्तं च गङ्गेशोपाध्यायेन- “निर्विकल्पकञ्च प्रमाप्रमाबहिर्भूतमेव व्यवहारानङ्गत्वात्” इति। अत एव निर्विकल्पकं ज्ञानं प्रमाबहिर्भूतत्वात् न भ्रमभिन्नम्। किञ्च तद्वति तत्प्रकारत्वम् अव्यभिचारित्वमित्युक्तेऽपि निर्विकल्पकेऽव्याप्तिः स्यात्। यतो हि इदं लक्षणं प्रकारघटितं, किन्तु निर्विकल्पकं हि प्रकारानवगाहि। नामजात्यादियोजनारहितं वैशिष्ट्यानवगाहि निष्प्रकारकं ज्ञानं निर्विकल्पकम्। अत एव कथितं वरदराजेन –

“अविशिष्टार्थविषयं प्रत्यक्षं निर्विकल्पकम्”[18] इति।

ननु निर्विकल्पकं प्रत्यक्षलक्षणस्य लक्ष्यमेव न इति चेन्न प्रत्यक्षसूत्रे प्रत्यक्षविभागवेलायाम् अव्यपदेश्यमित्यनेन निर्वकल्पकस्य स्वीकारात्।

अव्यभिचारिपदे तु नञः प्रसज्यरूपार्थे स्वीकृते सा अव्याप्तिर्वार्यते। अत्र नञः प्रसज्यप्रतिषेधेऽर्थः स्यात् तदभाववति तदप्रकारत्वम् इति, प्रसज्यस्य निषेधप्राधान्यात्। अर्थात् तदभाववद्विशेष्यक-तदप्रकारत्वमेवाव्यभिचारित्वम्। तादृशं चाव्यभिचारित्वं निर्विकल्पकेऽप्यस्ति इति लक्षणसंगतिः। अत एवोक्तं वृत्तौ –

“निर्विकल्पकस्य लक्ष्यत्वे तदभाववति तदप्रकारत्वम्”[19] इत्यर्थः।

**न्यायवैशेषिकयोर्नित्यस्वरूपकथने नञर्थविचारः**

उत्पत्तिविनाशरहितपदार्थस्य नित्यत्वं तु सर्वजनसिद्धम्। न्यायवैशेषिकशास्त्रे तु नित्यस्य पारिभाषिकमेकं लक्षणं प्रसिद्धं- “प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वम्” इति। यस्तु पदार्थो ध्वंसप्रागभावयोः प्रतियोगी न भवति स एव नित्य इति स्वीक्रियते। तत्र नित्यलक्षणस्य प्रागभावेऽतिव्याप्तिवारणाय ध्वंसाप्रतियोगित्वमिति विशेष्यदलमुपात्तम्। अनित्ये च ध्वंसाभावेऽतिव्याप्तिवारणाय प्रागभावाप्रतियोगित्वमिति विशेषणदलं प्रयुक्तम्।

“योऽभावो यस्य विरोधी प्रतिपक्षः, यश्चाभावो यस्य, घटस्याभावः, पटस्याभावः इत्यादिरीत्या तत्सम्बन्धितया अभावः प्रतीयते, तत्तस्याभावस्य प्रतियोगि भवति”[20] इति।

न्यायकुसुमाञ्जलौ अपि उक्तम्-

“अभावविरहात्मत्वं वस्तुनः प्रतियोगिता”[21] इति।

प्रतियोगितावान् भवति प्रतियोगी। न प्रतियोगी अप्रतियोगी। ननु नित्यलक्षणे अप्रतियोगिपदघटकनञः अर्थः क इति विचार्यः। यद्यत्र नञः प्रसज्यरूपार्थः स्वीक्रियते तदा अप्रतियोगिपदस्यार्थः स्यात् “प्रतियोगी न भवति” इति। अत्र अप्रतियोगीति पदं समस्तम्। तेन प्रसज्यनञो योऽयमर्थः स तु अत्यन्ताभाव एव। अत्यन्ताभावस्य तु स्वरूपमुक्तं-

“नित्यसंसर्गाभावत्वमत्यन्ताभावत्वम्”[22] इति।

एवं च पदार्थज्ञानं वाक्यार्थबोधं प्रति हेतुः इति नियमात् अत्यन्ताभावस्य ज्ञानार्थं नित्यत्वस्य ज्ञानमावश्यकम्। अपरतश्च नित्यस्य ज्ञानार्थं अत्यन्ताभावस्य ज्ञानमपरिहार्यम्। अत एव अनयोः परस्परमन्योन्याश्रयत्वम्। “स्वग्रहसापेक्ष-ग्रहसापेक्षग्राहकत्वम् अन्योन्याश्रयत्वम्” इति। अन्योन्याश्रितं च कार्यं न प्रभवेत्। अत एव अप्रतियोगिपदे प्रसज्यनञा तु लक्षणस्यास्य दोषः स्यात्। तस्मात् प्रसज्यपक्षो नाङ्गीकर्तव्यः। ननु तर्हि पर्युदास एव। तथात्वे तु अप्रतियोगिपदस्यार्थः स्यात् प्रतियोगिभिन्नः प्रतियोगिसदृशश्च , पर्युदासस्य विधिप्राधान्यात् सादृश्यादीनां च पर्युदासपरिगणनात्। प्रतियोगिभिन्नः प्रतियोगिसदृशश्च अनुयोगी अपि भवति। अभावे तु यस्याभावः स प्रतियोगी, यस्मिन्नभावः सोऽनुयोगी। अत उक्तं महेशचन्द्रन्यायरत्नमहोदयेन-

17 न्यायसूत्रस्य वात्स्यायनभाष्यम् (फणिभूषणसम्पादितम्, २०१८, पृ.१)

18 तार्किकरक्षा (कारिका १/१२)

19 न्यायसूत्रवृत्तिः (साबिर आलिसम्पादिता, २०१५, पृ.६८)

20 नव्यन्यायभाषाप्रदीपः (कालीपदतर्काचार्य, १९७३, पृ.२७)

21 न्यायकुसुमाञ्जलिः (३/२)

22 न्यायसिद्धान्तमुक्तावली (पञ्चाननभट्टाचार्यसम्पादिता, २०१६, पृ.८१)

"यत्राभावो वर्तते तदभावस्यानुयोगि भवति। यथा वायुः रूपाभावस्यानुयोगी भवति"[23] इति।

प्रागभावस्तु प्रतियोगिसमवायिकारणवृत्तिः। यथा घटस्य समवायिकारणं कपालद्वयम्। तेन "इह कपाले घटो भविष्यति" इत्यत्र प्रागभावस्यानुयोगी भवति कपालः। पुनश्च ध्वंसाभावोऽपि प्रतियोगिसमवायिकारणवृत्तिः। तेन इह कपाले घटो ध्वस्त इत्यत्र ध्वंसाभावस्यानुयोगी भवति कपालः। अत एवेत्थं प्रकारेण कपालः प्रागभावस्याप्रतियोगी तथा ध्वंसाभावस्यापि अप्रतियोगी भवति। तेन अनित्येऽपि कपाले नित्यलक्षणस्य अतिप्रसक्तिः। अत्र तु अतिव्याप्तिवारणाय अभावपदे अवच्छेदकनिवेशः कर्तव्यः। तेन "प्रागभावत्वावच्छिन्नाप्रतियोगित्वे सति ध्वंसत्वावच्छिन्नाप्रतियोगित्वम्" इति नित्यलक्षणं वक्तव्यम्। तथाहि कपालो यद्यपि घटप्रागभावं प्रति तथा घटध्वंसं प्रति अप्रतियोगी अनुयोगी वा भवति तथापि कपालो भविष्यति, कपालो ध्वस्त इत्येवं ध्वंसप्रागभावयोः प्रतियोगी भवत्येव कपालः। अत एव न तत्र नित्यलक्षणस्यातिव्याप्तिप्रसङ्गः इति मदीया चिन्तेति शिवम्।

**संदर्भ ग्रंथ : Bibliography:**


1. Gangopadhyaya, Mrinalkanti. *BhāṣāparicCede Sapta Padartha*, Kolkata, Sanskrit Book Dipo, 1421 (Bengali Year)
2. Kaundabhatta. *Vaiyākaraṇabhūṣaṇasāraḥ.* Edited by Nandikishor shastri and Sitaram Shastri and Balashastri, Varanasi, Chaukhamba Surabharati Prakashan, 2012
3. Maheschandra. *Navyanyāyabhāṣāpradīpaḥ*. Edited by Kalipada Tarkacharya, Kolkata, Sanskrit College, 1973
4. Mishra, Ramamanohara. *Bhūṣaṇasāra-paramalaghumañjuṣayoḥ siddhāntānāṃ samīkṣā*, Varanasi, Sampurnananda Sanskrit University, 1983
5. N.S Ramanuja. *Śabdabodhamīmāṃsā,* Pondicherry, Institute Francais De Pondicherry Rahstriya Sanskrit Sansthan
6. Nagesha. *Paramalaghumanjuṣā.* Edited by Lokamani Dahal, Varanasi, ChaukhambaSurabharatiPrakashan, 2011
7. Patanjali. *Vyākaraṇamahābhāṣyam*. Paspaśahnikam. Edited by Dandiswami Damodar Ashram, Kolkata, Dakshineswar Ramakrishna Sangha, 1417 (Bengali Year)
8. Raghunatha. *Nañvādaḥ*. Edited by Sanjit Kumar Sadhukhan, New Delhi, Rshtrya Pandulipi Mission and Dev publishers and distributers, 2013
9. Shankaramishra. *Vaiśeṣikasūtropaskāraḥ.* Edited by Seikh Sabir Ali, Sanskrit Book Dipo, 2012
10. Viswanatha. *Bhāṣapariccedaḥ.* Edited byPanchanan Bhattacharya, Kolkata,Mahabodhi Book Egency, 2016
11. Viswanatha. *Kārikāvalī.* Edited bySankara Rama Shastry, Madras,Balamanorama Press, 1923
12. Viswanatha. *Nyāyasūtravṛttiḥ*. Edited by Seikh Sabir Ali, Kolkata, Sanskrit Pustak Bhandar, 2015


[23] नव्यन्यायभाषाप्रदीपः (कालीपदतर्काचार्य, १९७३, पृ.२८)